दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णप्रतिपदा
चैत्र 20 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-161 | 1 | अप्रैल 03, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशे सहस्रशः अनुबन्धकर्मिणां दैनिकवेतनभोगिनां च कृते नियमितीकरणस्य उपहारः

3 संस्कृतविद्यालय- महाविद्यालय-शिक्षकसंघस्य उत्तराखण्डस्य निर्वाचनं सम्पन्नम्, डॉ. रामभूषण बिजल्वाण तृतीयवारं प्रदेशाध्यक्षः निर्वाचितः

4 जनगणना-२०२७: राष्ट्रपति-उपराष्ट्रपतिभ्यां 'स्व-गणना' उपक्रमस्य शुभारम्भः

## भारतस्य विकासार्थं नागरिक-केन्द्रित-प्रशासनस्य आवश्यकता: प्रधानमन्त्री



प्रधानमन्त्रिणा नरेन्द्रमोदिना अवधानं दत्तम् यत् भारतस्य द्रुतगत्या परिवर्त्यमानानां आकांक्षानां कृते न केवलं कार्यसाधकस्य प्रत्युत नागरिक केन्द्रितस्य प्राशासनिक-प्रतिरूपस्य आवश्यकता वर्तते । प्रधानमन्त्री ऐषमः कर्मयोगी-साधना-सप्ताह इत्याख्ये सम्बोधनावसरे दृश्याङ्कन-सम्बद्धे सन्देशे एतत् सर्वमपि उक्तवान्। जीवनस्य सुगमतायाः गुणवत्तायाः च परिष्कारः शासनस्य प्राथमिकः केन्द्रबिन्दुः भवेत् इत्यपि प्रधानमन्त्री निगदितवान् । प्रौद्योगिक्याः महत्त्वं प्रतिपादयन् प्रधानमन्त्री विगतैकादशवर्षेषु शासनस्य, सेवा-वितरणस्य, अर्थव्यवस्थायाः अथ प्राशासकीय-कार्येषु प्रौद्योगिक्याः गहन-एकीकरणं प्रति सर्वान् इंगितवान्। अवधेयव्यमस्ति यत् अद्यप्रभृति एकसप्ताहाभ्यन्तरे कर्मयोगी-साधना-सप्ताहइत्याख्यः कार्यक्रमः आरब्धः। कार्मिक-प्रशिक्षण विभागेन, क्षमता-निर्माण-आयोगेन, कर्मयोगी-भारतेन च सामूहिकरूपेण अयं कार्यक्रमः आयोज्यते। अस्य कार्यक्रमस्य उद्देश्यं सम्पूर्णे देशे नागरिकसेवानां क्षमतायाः, निष्पादनस्य, कार्यक्षमतायाः च निर्माणं वर्त्तते ।

## न्यायिक-अधिकारिणां निरोधः निन्दनीयः-: सर्वोच्च-न्यायालयस्य तीव्रा आलोचना



पश्चिम बङ्गाल-राज्यस्य मालदा मण्डले 'विशेष-गहन-पुनरीक्षण' कार्ये संलग्नानां सप्त-न्यायिक-अधिकारिणां 'बन्धक' रूपेण निरोधस्य घटना निन्दनीया इति सर्वोच्च न्यायालयः गतदिनेअघोषयत्। न्यायालयः अस्याः घटनायाः स्वतः संज्ञानं स्वीकृत्य राज्य-प्रशासनस्य तीव्रां आलोचनां कृतवान्। मुख्य न्यायाधीशस्य सूर्यकान्तस्य नेतृत्वे पीठानेन राज्यस्य मुख्य सचिवः, आरक्षिमहानिदेशकः च आगामि-षड्-दिनाङ्के आभासीय माध्यमेन उपस्थितये आदिष्टाः। न्यायालयेन निर्वाचन आयोगः अस्मिन् विषये सी.बी.आई. अथवा एन.आई.ए. माध्यमेन अन्वेषणं कर्तुं अनुमतः। अपि च, अधिकारिणां सुरक्षा-सुनिश्चयाय देशस्य कुत्रचित् अपि केन्द्रीय-बलानां याचनां कर्तुं आयोगः स्वतन्त्रः अस्ति। पीठानेन टिप्पणी कृता यत् एषा घटना न्यायिक-अधिकारिणां मनोबलं अपाकर्तुं तथा निर्वाचन प्रक्रियां बाधयितुं कृतः 'सुनियोजित-प्रयासः' दृश्यते।

## पश्चिम-बङ्गले द्वितीय-चरणस्य नामाङ्कन-प्रक्रिया आरब्धा

पश्चिम-बङ्गाल-विधानसभा निर्वाचनाय द्वितीय-चरणस्य नामाङ्कन-प्रक्रिया गतदिने अधिसूचनया आरब्धा। अस्मिन् चरणे अस्मिन् मासे एकविंशति दिनाङ्के द्विचत्वारिं-शतधिक निर्वाचन-क्षेत्रेषु मतदानं भविष्यति। अभ्यर्थिनः एप्रिल मासस्य प्रथम दिनांकपर्यन्तं स्वकीयं नामाङ्कन-पत्रं दातुं शक्नुवन्ति, येषां परीक्षणं अनन्तरं भविष्यति। नाम प्रत्यावर्तनं कर्तुं अन्तिमा तिथिः एप्रिल मासस्य त्रयोदश दिनांकः अस्ति। अपरपक्षे, असम-केरळ-पुदुच्चेरी राज्येषु एक-चरणीय-मतदानस्य कृते प्रचार-कार्यं तीव्रमभवत्। गतदिनेअस्माकं निर्वाचन क्षेत्र-विशेषे केरळ-राज्यस्य कोट्टायम-मण्डलस्य 'काञ्जिरप्पल्ली' क्षेत्रस्य उपरि दृष्टिः अस्ति, यत्र चतुर्णाम् प्रमुखाभ्यर्थिनां मध्ये प्रबला स्पर्धा वर्तते ।

## पेट्रोरसायन-उत्पादेषु सीमाशुल्कस्य विमोचनम्-: केन्द्रसर्वकारस्य निर्णयः




पश्चिमैशिया-संघर्षमध्ये जायमानस्य वैश्विक-अशोधित-तैलस्य आपूर्ती समागतायां बाधायां प्रशासनेन जूनमासस्य त्रिंशत् दिनाङ्कपर्यन्तं प्रमुखेषु पेट्रोरसायन-उत्पादेषु सीमाशुल्कं विमोचितम्। वित्तमन्त्रालयः संसूचितः यत्, देशीय-उद्योगेषु आवश्यक-पेट्रोरसायनानां उपलब्धतां सुनिश्चितुं अस्थायी-उपायरूपेण एषः उपायः स्वीकृतः अस्ति अस्ति। एतेन सम्बद्ध-क्षेत्रेषु व्ययस्य भारः न्यूनीभवति, आपूर्तिः स्थिरी-भवति, उपभोक्तृभ्यः आश्वस्तिः च प्राप्यते इति मन्त्रालयः अवदत्। मन्त्रालयः एतदपि अवदत् यत्, आहत्य चत्वारिंशत् सङ्ख्याकनि वस्तूनि सीमाशुल्कात् मुक्तानि सन्ति इति। एतेषु मेथनाल्, अमोनिया, टोलुन्, स्टैरिन्, डैक्लोरो-मीथेन्, विनैल् क्लोरैड् मोनोमर्स इत्येतानि सन्ति ।

## रक्षा-निर्याते भारतस्य ऐतिहासिकं पदक्षेपम्-: ३८,४२४ कोटि-रूप्यकाणां लक्ष्यप्राप्तिः

विगते वित्तीय-वर्षे भारतस्य रक्षा-निर्यातः चतुर्विंशत्यधिकचतुःशतोत्तर अष्टत्रिंशत् सहस्र कोटि-रूप्यकाणाम् ऐतिहासिकं स्तरं प्राप्तवान्। एषा वृद्धिः गतवर्षस्य तुलनायां द्वाषष्टिः दशांश षट्षष्टिः प्रतिशतं अधिकास्ति। रक्षा मन्त्रालयानुसारं अस्यां सफलतायां 'सार्वजनिक-क्षेत्रस्य उपक्रमाणां' सहभागिता चतुः पंचाशत् दशांश अष्ट चत्वारि प्रतिशतं तथा च 'सर्वकारीयेतर-क्षेत्रस्य' योगदानं पंचचत्वारिंशत् दशांश एकं षट् प्रतिशतं वर्तते। एषा तीव्रा वृद्धिः भारतीय-रक्षा-उत्पादानां वैश्विक-स्वीकार्यतां तथा अन्ताराष्ट्रीय-आपूर्ति-शृङ्खलासु भारतस्य सुदृढ-स्थितिं प्रदर्शयति। रक्षामन्त्री राजनाथ सिंहः एतां उपलब्धिं श्लाघनीयं उक्तवान् यत् भारतं रक्षा-उपकरणानां निर्माणाय विश्वस्य प्रमुखं भवितुं वेगेन अग्रे सरति।

## सुभाषितम्

**काकै सह प्रवृद्धस्य, कोकिलस्य कला गिरः।**
**खलसङ्गेऽपि नैष्ठुर्यं, कल्याणप्रकृते कुतः।।**

कौओं के झुण्ड में सम्मिलित कोयल को उसकी मधुर आवाज से आसानी से अलग से को पहचाना जा सकता है। इसी प्रकार निष्ठुर और दुष्ट व्यक्तियों के समूह में भी एक सज्जन व्यक्ति क्या अपनी दूसरों का कल्याण करने के प्रवृत्ति के कारण आसानी से नहीं पहचाना जा सकता है?

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्

## प्रधानमन्त्री नरेन्द्रमोदी २०२७-वर्षस्य जनगणनार्थं स्वकीयं विवरणं पञ्जीकृतवान्

प्रधानमन्त्री नरेन्द्रमोदी २०२७-वर्षस्य जनगणनार्थं स्वकीयं विवरणं पञ्जीकृतवान्। सामाजिक-माध्यमे (Social Media) एकां विवृतिं प्रसारयन् मोदी महोदयः अवदत् यत् इयं प्रथमा वारः अस्ति यत्र डिजिटल-माध्यमेन विवरणानां सङ्ग्रहणं क्रियते। सः अग्रे उक्तवान् यत् अनया सुविधया देशस्य जनाः स्वकीयस्य सम्पूर्ण-परिवारस्य विवरणं स्वयं पञ्जीकर्तुं शक्तिं प्राप्नुवन्ति। प्रधानमन्त्री नागरिकान् स्वपरिवारस्य विवरणं स्वयं पञ्जीकर्तुं जनगणना-प्रक्रियायां सम्मिलितं भवितुं च साग्रहं प्रार्थितवान्।

# HP Vidhansabha Session - पीएम-ग्राम्य-मार्ग-योजनायाः मन्दगत्याः विषये काङ्ग्रेस-विधायकैः स्वसर्वकारः एव लक्षितः




**हिमसंस्कृतवार्ताः - शिमला।** 'प्रधानमन्त्री-ग्राम्य-मार्ग-योजना' (PMGSY) इत्यस्याः अन्तर्गतं प्रचलति कार्यस्य मन्दगतिं दृष्ट्वा काङ्ग्रेस-विधायकाः स्वसर्वकारस्य विरुद्धमेव मुखराः अभवन्। गुरुवासरे विधानसभायाः प्रश्नकालस्य समये देहरा-ज्वालामुखी क्षेत्रयोः मार्ग-निर्माणस्य शैथिल्यस्य विषयः प्रबलतया उत्थापितः। देहरा-क्षेत्रस्य काङ्ग्रेस-विधायिका कमलेश-ठाकुर-महोदया अवदत् यत् १८ जुलाई २०२४ दिनाङ्के येषां पञ्च-मार्गाणां नवीनीकरण-कार्यं (Upgradation) दत्तं, तत् एतावता केवलं ५० प्रतिशतं पूर्णम् अभवत्। सा आरोपं कृतवती यत् चण्डीगढ़-नगरस्य कश्चन निविदाकारः (contractor) स्वैच्छिक-रीत्या कार्यं करोति, समयसीमा च न पाल्यते। निर्माण-कार्येषु शिथिलतायाः कारणेन मार्गेषु निरन्तरं धूली उड्डीयते, येन जनसामान्यानां स्वास्थ्ये प्रतिकूलः प्रभावः जायते। सा उक्तवती यत् सम्बन्धित-निविदाकारस्य विरुद्धं कठोर-कार्यविधिः करणीया। तस्य तैल-यन्त्राणि (Machinery) कदाचित् शाहपुरं कदाचित् ज्वालामुखीं च नीयन्ते, येन कार्यं बाधितं भवति।

## विरोधे सत्यपि अयोग्य-घोषितानां विधायकानां पेन्शन-निरोध-विधेयकं सदने पारितम्

हिमाचल-विधानसभायाः बजट-सत्रस्य अन्तिम-दिने गुरुवासरे 'हिमाचलप्रदेश विधानसभा सदस्यानां वृत्तिः एवं पेन्शन-संशोधन-विधेयक-२०२६' पारितं जातम्। यद्यपि विपक्षेण अस्य विधेयकस्य तीव्र-विरोधः कृतः। प्रतिपक्षस्य आरोपः अस्ति यत् एतत् संशोधनं 'रेट्रोस्पेक्टिव' (भूतलक्षी) प्रभवं न भवितुम् अर्हति, अपितु केवलं भविष्यत्-कालाय एव भवेत्।

**विपक्षस्य तर्कः-** भाजपा-विधायकः रणधीरशर्मा अवदत् यत् केवलं कतिपयानां विधायकानां पेन्शन-लाभं रोद्धुमेव एतत् संशोधनम् आनीतं, यत् प्रतिशोधस्य भावनां दर्शयति। नेता-प्रतिपक्षः जयरामठाकुरः उक्तवान् यत् ये विधायकाः 'अन्तरात्मनः स्वरेण' निर्णयं कृतवन्तः, तेषां विरुद्धं राजनैतिक-प्रतिशोधः क्रियते।

**सर्वकारस्य पक्षः -** उद्योगमन्त्री हर्षवर्धनचौहानः अवदत् यत् दल-परिवर्तन-निवारणाय एव एतत् पदं स्वीकृतम्। सः आरोपं कृतवान् यत् विपक्षः दल-परिवर्तनं प्रोत्साहयति तथा च निर्वाचित-सर्वकारान् पातयितुं प्रयतते।

**अध्यक्षस्य निर्णयः -** विधानसभा-अध्यक्षः कुलदीपसिंहपठानिया स्पष्टीकृतवान् यत् वर्तमानकाले १४-तमी विधानसभा चलति, अतः एतत् संशोधनं १४-तम-विधानसभायाः एव उपरि प्रभावी भविष्यति।

**मुख्यमन्त्रिणः वक्तव्यम्: -** मुख्यमन्त्री अवदत् यत् अयं नियमः भविष्ये काङ्ग्रेस-भाजपयोः उभय-पक्षयोः विधायकानां कृते समानरूपेण प्रवर्तितं भविष्यति।

# हिमाचल-विधानसभायाः बजट-सत्रम् अनिश्चितकालाय स्थगितम्; १०० प्रतिशततः अधिका आसीत् कार्य-उत्पादकता




**हिमसंस्कृतवार्ताः - शिमला।**
हिमाचलप्रदेश-विधानसभायाः बजट-सत्रं गुरुवासरे अनिश्चितकालाय स्थगितं जातम्। द्वि-चरणेषु प्रचलति अस्मिन् सत्रे आहत्य १६ उपवेशनेषु विविधानां विधायी-कार्याणां नीतिगत-विषयाणां च उपरि विस्तृता चर्चा कृता। सत्रस्य आरम्भः १६ फरवरी दिनाङ्के राज्यपालस्य अभिभाषणेन सह अभवत्, यस्मिन् सर्वकारस्य नीतिगत-कार्यसूची (Agenda) उपस्थापिता। तदनन्तरं १८ फरवरी दिनाङ्के 'राजस्व-हानि-अनुदानस्य' पुनः स्थापनस्य प्रस्तावः पारितः। अल्पविरामानन्तरं १८ मार्च दिनाङ्कतः सत्रस्य कार्यविधिः पुनः आरब्धा। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खु-महोदयेन २१ मार्च दिनाङ्के वित्तवर्षं २०२६-२७ कृते राज्यस्य सामान्य-बजटं प्रस्तुतं, यत् गहनचर्चोत्तरं ३० मार्च दिनाङ्के पारितं जातम्।

सत्रस्य अवधौ विधायी-उत्तरदायित्वे विशेषं बलं प्रदत्तम्। प्रश्नकालस्य समये सर्वकारेण आहत्य ६१७ प्रश्नानां (४७१ ताराङ्कित-प्रश्नाः तथा १४६ अताराङ्कित-प्रश्नाः) उत्तराणि दत्तानि। विभिन्न-संसदीय-नियमानां अन्तर्गतं जनहितस्य अनेकविषयेषु चर्चा अभवत्, येषु नियम ६१ इत्यस्मिन् चतस्रः चर्चाः। नियम ६२ अन्तर्गतं द्वे चर्चे। नियम ६७, १०१, १३०, ३२४: प्रत्येकस्मिन् एका एका चर्चा। सदस्यैः स्व-निर्वाचनक्षेत्राणां राज्यस्य च सम्बद्धाः ९४ महत्त्वपूर्णाः विषयाः उत्थापिताः।

## कार्याणां निष्पादनं जनसहभागिता च

विधायी-कार्याणां दृष्ट्या अस्मिन् सत्रे प्रायः नव (९) सर्वकारीय-विधेयकानि उपस्थापितानि चर्चापश्चात् च पारितानि। अनेन सह सदनस्य पटले विविधानां समितीनां ६० प्रतिवेदनानि (Reports) स्थापितानि। पूर्वविधायकस्य भगतरामचौहानस्य निधने भावपूर्णा श्रद्धाञ्जलिः अर्पिता।
लोकतान्त्रिक-प्रक्रियायां जनसहभागितां वर्धयितुं विभिन्न-शिक्षण-संस्थानां ६४१ छात्रैः सदनस्य कार्यप्रणाली दृष्टा।
आहत्य ९० होराः यावत् प्रचालितायाः सदनस्य कार्यविधेः उत्पादकता १०० प्रतिशततः अधिका अभवत्। मुख्यमन्त्रिणः विपक्षनेतुः च नेतृत्वे पक्ष-विपक्षयोः उत्तम-समन्वय-कारणात् विधायी-कार्याणां निष्पादनं उच्चस्तरीयं जातम्।।

# राज्ये प्रथमवारं सर्वकारीयक्षेत्रे 'पैट-स्कैन' (PET Scan) सुविधा; मुख्यमन्त्रिणा आईजीएमसी-मध्ये 'न्यूक्लियर-मेडिसिनखण्डस्य उद्घाटनं कृतम्



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः इन्दिरागान्धी-आयुर्विज्ञान-महाविद्यालये (IGMC) शिमलायां 'न्यूक्लियर-मेडिसिनखण्डस्य (Nuclear Medicine Block) विधिवत् उद्घाटनं कृतवान्। अनेन सह अधुना राज्यस्य सर्वकारीयक्षेत्रे प्रथमवारं 'पॉज़िट्रॉन एमिशन टोमोग्राफी' (पैट-स्कैन) इति विशिष्टा चिकित्सा-सुविधा उपलब्धा जाता। एषा सुविधा रोगाणां प्रारम्भिक-स्तरे, चयापचय (Metabolic) तथा आणविक (Molecular) स्तरे च अन्वेषणं कर्तुं समर्था अस्ति। पारम्परिक-इमेजिङ्ग-तन्त्रज्ञानस्य (यथा सीटी-स्कैन, एमआरआई च) तुलनायां, 'पैट-तकनीक' शरीरस्य परिवर्तनानां पूर्वमेव ज्ञानं ददाति। इयं सुविधा कर्कट-रोगस्य (Cancer) विभिन्न-चरणानां निर्धारणे, उपचारस्य प्रभाव-आकलने, रोगस्य पुनरावृत्तेः ज्ञाने तथा पूर्वानुमान-प्रक्रियायां महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। अस्याः तकनीक-प्रयोगस्य व्याप्तिः अतीव विशाला अस्ति। एषा मुख्यतया अधोनिर्दिष्टानां रोगाणां प्रबन्धने उपयुज्यते:

> कर्कट-रोगाः: मस्तिष्क-अर्बुदं (Brain Tumor), ग्रीवा-मुखयोः कर्कटः, थायरायड-कार्सिनोमा, फुफ्फुस-कार्सिनोमा, स्तन-कर्कटः (Breast Carcinoma), तथा जठराग्नि-सम्बन्धिनः (Gastrointestinal) रोगाः।

> अन्ये क्षेत्राणि: अर्बुद-विज्ञानस्य (Oncology) अतिरिक्तं, हृदयरोगाणां, स्नायुतन्त्रस्य (Neurology), सङ्क्रमणस्य तथा शोथ-सम्बन्धि-व्याधीनां (Inflammation) आकलने अपि अस्याः उपयोगः भवति, यत्र सामान्या इमेजिंग् स्पष्टं निष्कर्षं न ददाति।

**स्वास्थ्य-क्षेत्रे ३००० कोटि-रूप्यकाणां निवेशः**
मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारः स्वास्थ्य-क्षेत्रे अत्याधुनिक-तन्त्राणां समावेशाय कटिबद्धः अस्ति। तेन अत्र केचन प्रमुखाः विषयाः घोषिताः एमआरआई सुविधा - अस्मिन् संस्थाने '३ टेस्ला एमआरआई' (3 Tesla MRI) यन्त्रस्य अपि शुभारम्भः जातः। आगामि-काले सर्वकारः राज्यस्य सर्वेषु चिकित्सा-महाविद्यालयेषु तान्त्रिक-उन्नयनाय (Technical Upgrade) ३,००० कोटि-रूप्यकाणां निवेशं करिष्यति।
आईजीएमसी-शिमला मध्ये 'स्पैक्ट-सीटी स्कैन' (SPECT-CT Scan) यन्त्रस्य स्थापनाय मुख्यमन्त्रिणा ८ कोटि-रूप्यकाणां घोषणा कृता।

## श्रीमद्भगवद्गीतोपदेशः



कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति॥

श्रीमद्भगवद्गीता श्लोक २.४३

हे महाबाहु! जिसकी इन्द्रियाँ अपने-अपने विषयों से सभी प्रकार से विरक्त होकर उसके वश में रहती हैं, उसी मनुष्य की बुद्धि स्थिर रहती है।

# बिलासपुरस्थिते एम्सचिकित्सालये कृष्णमोतियस्य (ग्लूकोमा) रोगस्य आधुनिकयन्त्रैः उपचारः क्रियते, नेत्रशल्यक्रिया उच्चप्रौद्योगिकीयुक्ता भविष्यति




**हिमसंस्कृतवार्ताः शिमला ।** बिलासपुरस्थिते एम्स-चिकित्सालये अधुना नेत्ररोगिणां कृते उत्तमतरस्य आधुनिकचिकित्सासुविधायाः व्यवस्था भविष्यति। संस्थानस्य नेत्ररोगविभागे (ऑफ्थाल्मोलॉजी) ग्लूकोमा (कृष्णमोतिय) रोगस्य शल्यक्रियायै अत्याधुनिकानि उपकरणानि उपलब्धानि करिष्यन्ते। एतेषां उपकरणानां आगमनेन रोगिणः जटिलनेत्रशल्यक्रियार्थं बाह्यराज्यानि महानगराणि वा गन्तुं न बाध्याः भविष्यन्ति। विशेषतः वृद्धाः आर्थिकदृष्ट्या दुर्बलवर्गस्य च रोगिणः अस्य लाभं प्राप्स्यन्ति।ग्लूकोमा नाम गम्भीरः रोगः अस्ति, यस्मिन् नेत्रनाड्यः प्रभाविताः भवन्ति, समये उपचाराभावे दृष्टिनाशः अपि भवितुम् शक्नोति। अतः आधुनिकशल्यक्रियासुविधायाः उपलब्धतया समये उपचारः सम्भविष्यति, तथा रोगिणां दृष्टिः रक्षितुं शक्यते।

नेत्ररोगविभागे स्थाप्यमाने शल्यक्रियासमूहे प्रायः एकचत्वारिंशत् (४१) प्रकाराणि आधुनिकोपकरणानि सन्ति। एतेषु विभिन्नप्रकाराणि फोर्सेप्स, कर्तरिकाः (कैंची), सुईधारकाः (नीडल होल्डर), स्पेकुलम् तथा अन्यानि शल्योपकरणानि अन्तर्भवन्ति, येन शल्यक्रिया अधिकसुरक्षा-सहितं सुस्पष्टं च भविष्यति। अनेन न केवलं शल्यक्रियायाः सफलतादरः वर्धिष्यते, अपि तु रोगिणां शीघ्रस्वास्थ्यलाभः अपि भविष्यति।तथैव, चिकित्सालये एव उत्तमसुविधायाः उपलब्धतया उपचारव्ययः अपि न्यूनः भविष्यति। एतेषां उपकरणानां क्रयणार्थं संस्थानेन निविदाप्रक्रिया आरब्धा अस्ति। अस्याः सुविधायाः आरम्भे सति एम्स-अस्पताले नेत्ररोगचिकित्सायाः स्तरः अधिकं सुदृढः भविष्यति। बिलासपुरस्य समीपवर्तिनां च जनपदानां सहस्रशः रोगिणः अस्य प्रत्यक्षलाभं प्राप्स्यन्ति।

# महिला-आरक्षण-विषये सर्वसम्मति-निर्माणाय सर्वकारः प्रयत्नशीलः: किरेन रिजिजू

संसदीय-कार्य-मन्त्री किरेन रिजिजू महोदयः गतदिनेराज्यसभाम् असूचयत् यत् महिला-आरक्षण-विधेयकस्य उपरि सविस्तरं चर्चायै संसदः कार्यचरणम् गतदिनेआरभ्य स्थगिता भविष्यति सममेव च सप्ताहद्वय-त्रयस्य अनन्तरं पुनः प्रारप्स्यते। कांग्रेस-दलस्य जयराम रमेश महोदयस्य प्रश्नस्य उत्तरं यच्छन् रिजिजू-महोदयः उक्तवान् यत् सर्वकारेण अस्मिन् विषये अशीतिः प्रतिशत-दलेभ्यः अधिकैः सह परामर्शः कृतः। तेन एतदपि स्पष्टीकृतं यत् सर्वकारः किमपि स्वयमेव निर्णयं न स्वीकरोति, अपितु सर्वेषां दलानां साहाय्येन सर्वसम्मतिं निर्मातुं प्रयत्नं करोति।

अपरपक्षे, राज्यसभायां विपक्षस्य नेता मल्लिकार्जुन खरगे महोदयः अस्मिन् विषये सर्वदलीयोपवेशनम् आकारयितुं याचनां कृतवान् येन सर्वे स्वकीयं मतं उपस्थापयितुं शक्नुयुः। तेन उक्तं यत् कांग्रेस-दलं महिला-आरक्षणस्य विरुद्धं नास्ति ।

# रिकाङ्गपिओ-मध्ये भविष्यति राज्यस्तरीय-हिमाचल-दिवस-समारोहः, मुख्यसचिवेन सज्जतानां समीक्षा कृता



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यसचिवः सञ्जयगुप्त-महोदयः गुरुवासरे शिमलायां राज्यस्तरीय-हिमाचल-दिवस-समारोहस्य सज्जतानां विषये समीक्षा-गोष्ठ्याः अध्यक्षतां कृतवान्। एषः समारोहः किन्नौर-जनपदस्य 'रिकाङ्गपिओ' आरक्षक-क्रीडाङ्गणे (Police Ground) आयोजितः भविष्यति। सः सम्बन्धित-विभागेभ्यः कार्यक्रमस्य सफल-आयोजनाय समयबद्धं प्रभावी-व्यवस्थां च निश्चितं कर्तुं निर्देशान् दत्तवान्। गोष्ठ्यां सर्वेषां जनपदानाम् उपायुक्ताः आभासीय-माध्यमेन सम्मिलिताः अभवन्, मुख्यसचिवं च स्व-स्व-जनपदेषु जायमानानां सज्जतानां विषये ज्ञापितवन्तः।

मुख्यसचिवेन उक्तं यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः राज्यस्तरीय-समारोहस्य अध्यक्षतां करिष्यति। तेन विभिन्नविभागानां मध्ये उत्तम-समन्वये बलम् दत्तं, तथा च विविधानां विषयाणां अग्रिम-व्यवस्थां कर्तुं सूचितम्।

यासु -

१. सुरक्षा व्यवस्थाः आरक्षक-व्यवस्था, यातायात-प्रबन्धनं च।

२. आधारभूत-सुविधाः: स्वच्छता, पेयजल-व्यवस्था, चिकित्सा-सुविधाः, आपातकालीन-सेवाः च।

३. मञ्च-प्रबन्धनम्: उपवेशनस्य उचिता व्यवस्था, मञ्च-सज्जा, तथा अविच्छिन्ना विद्युत्-आपूर्तिः।

**जनसहभागिता वैकल्पिक-व्यवस्था च**

मुख्यसचिवेन सामान्यजनानां सक्रिया सहभागिता सुनिश्चितां कर्तुं बलम् दत्तम्। तेन अधिकारिणः उक्ताः यत् प्रतिकूल-ऋतौ (Bad Weather) अथवा हिमपातादि-परिस्थितीनां निवारणाय 'वैकल्पिक-व्यवस्था' (Alternative arrangements) पूर्वमेव करणीया। सम्बन्धित-अधिकारिणः नियमितरूपेण आयोजनस्थलस्य निरीक्षणं कुर्वन्तु। गोष्ठ्यां आरक्षक-महानिदेशकः (DGP) अशोकतिवारी महोदयः अन्ये च वरिष्ठाधिकारिणः उपस्थिताः आसन्।

# इतिहासविभागस्य शैक्षणिकभ्रमणम्- 31 सदस्यीयं दलं ग्वालियरं गतम् अनुभवात्मकशिक्षां प्रति गमनम्। सरदार पटेल विश्वविद्यालयस्य मण्डी इत्यस्य दलं जीवाजी विश्वविद्यालयं ग्वालियरं प्रति गतम्।

**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदार पटेल विश्वविद्यालयस्य मण्डी इत्यस्य इतिहासविभागद्वारा सहमतिज्ञापनस्य अंतर्गते संकाय-विद्यार्थी सांस्कृतिकम् आदान-प्रदानं, शैक्षणिक- भ्रमणकार्यक्रमस्य अंतर्गते 31 सदस्यीयं दलं जीवाजी विश्वविद्यालयः ग्वालियरं प्रति हर्षोल्लासेन निर्गतः।अस्मिन् अवसरेऽध्यक्षः आचार्यः ललितकुमार अवस्थी दलाय हरितफलकं प्रदर्श्य प्रेषितवान्। उक्तवान् च यत् वर्तमानकाले उच्चशिक्षा केवलं कक्षाकक्षे न सीमिताऽस्ति, अनुभवात्मक- अधिगमेन विद्यार्थिनां समग्रविकासः संभवः।

एतादृशानि भ्रमणानि विद्यार्थिनः विभिन्नक्षेत्राणां ऐतिहासिकधरोहरं, सांस्कृतिकविविधतां शैक्षणिकपरिवेशं च निकटतः अवगन्तुम् अवसरं प्रददति। एतादृशानां कार्यक्रमाणामुद्देश्यः विद्यार्थिषु शोधपरकदृष्टिकोणं विकसितकरणम्, ऐतिहासिकतथ्यानां प्रत्यक्षाध्ययनस्य प्रवृत्ति- प्रोत्साहनं विभिन्नविश्वविद्यालयानां मध्ये अकादमिक- सहयोगं सुदृढ़करणं च। विद्यार्थिनः अस्य अवसरस्य पूर्णतः सदुपयोगं कृत्वा विश्वविद्यालयस्य नाम रोशनं कुर्युः इति आग्रहं कृतवान्।कार्यक्रमस्य संयोजकः डॉ. राकेशकुमार शर्मा विस्तृतं विवेचनं दत्त्वा उक्तवान् यत् एतत् भ्रमणं केवलम् औपचारिकयात्रां न, अपि तु सुनियोजितं शैक्षणिकं कार्यक्रमम् अस्ति।

यस्य अन्तर्गतं विद्यार्थिनः जीवाजी विश्वविद्यालयं ग्वालियरं निकटतमक्षेत्रस्य प्रमुखानि ऐतिहासिकस्थलानि मतावली, पडावली, बटेश्वरमन्दिरसमूहः, ग्वालियरदुर्गं इत्यादीनां विभिन्नसंग्रहालयानां सांस्कृतिकधरोहराणां च भ्रमणम् अध्ययनं च करिष्यन्ति। जीवाजी विश्वविद्यालये आयोजितेषु विविधशैक्षणिक- सांस्कृतिकगतिविधिषु सहभागितां करिष्यन्ति।

विद्यार्थिषु अस्मिन् शैक्षणिकयात्रायां विषये विशेष उत्साहः दृष्टः, तैः च इदं स्वशैक्षणिकजीवनस्य महत्वपूर्णम् अवसरम् इति उक्तम्। उल्लेखनीयम् अस्ति यत् सरदार पटेल विश्वविद्यालय मण्डी इत्यस्य इतिहासविभागः समये समये एतादृशीनां नवाचारी शैक्षणिकक्रियाणां माध्यमेन विद्यार्थिनः व्यावहारिकशोधपरकशिक्षां प्रदातुं सततं प्रयासरतः अस्ति, येन ते राष्ट्रीयस्तरे प्रतिस्पर्धात्मकसशक्ताः भवेयुः। भ्रमणे विभागाध्यक्षः डॉ. राकेशकुमार शर्मा, सहायकाचार्यः डॉ. रामपाल, शोधार्थी वेदप्रकाशः, राहुलकुमारः, डोलमा, इतिहाससोसायटी अध्यक्षः सानूकुमारः, मीडियाक्लब अध्यक्षः दीपक दीपांशुः, खुशबू, अनीशा, कल्पना, गौरव, उमा भारती, लखवीरः, विक्रान्तः, मनीषा इत्यादयः एम. ए. कक्षा 26 विद्यार्थिनः, 3 शोधार्थिनः, 2 संकायसदस्याः भ्रमणाय गतवन्तः।



# उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम् एवं साहित्य-अकादमी, नवदेहली इत्यनयोः संयुक्ततत्त्वावधाने आयोजिता एकदिवसीया राष्ट्रिया संगोष्ठी



**वार्ताहरः- डॉ. प्रकाशपन्तः हरिद्वारम्।** विकसितभारतस्य निर्माणे संस्कृतयुवलेखकानां योगदानम् इति विषयमादाय उत्तराखण्डसंस्कृतविश्वविद्यालयस्य सरस्वतीसभागारे चैत्रशुक्लतृतीया-तिथौ एकदिवसीये राष्ट्रिय-चर्चासत्रे भारतस्य विभिन्नप्रान्तेभ्यः समागतैः संस्कृतयुवलेखकैः तेषां कृतयः शोधपत्राणि च चर्चितानि। सत्रेऽस्मिन् मुख्यातिथिरूपेण संस्कृतशिक्षासचिवः श्रीदीपकगैरोला-महोदयः उपस्थितः आसीत्। सोऽवदत् यत् राज्ये संस्कृतस्य व्यापकरूपेण प्रचाराय, प्रसाराय, संवर्धनाय, संरक्षणाय च नैकाः कार्ययोजनाः निर्मिताः सन्ति। सः सूचितवान् यत् उत्तराखण्डसर्वकारेण त्रिंशदधिकद्विसहस्रतम-वर्षपर्यन्तं राज्यस्य पञ्चनवतिविकासखण्डेषु संस्कृतग्रामाणां स्थापनाय लक्ष्यं निर्धारितं वर्तते। तिरुपतिस्थ केन्द्रीय-संस्कृत-विश्वविद्यालयस्य पूर्व-कुलपतिः डॉ. हरेकृष्ण-शतपथीमहोदयः अवदत् यत् वर्तमानकाले भारतराष्ट्रं विकासस्य मार्गे अग्रेसरो वर्तते इति। अस्मिन् राष्ट्रनिर्माणकार्ये संस्कृत-युव-लेखकानां दायित्वम् इतोऽप्यधिकं वर्तते यतोहि इयं भाषा न केवलं भारतस्य अपितु विश्वस्य सर्वासां भाषाणां जननी अस्ति, तथा भाषेयं नैतिकमूल्यानां संस्कृतेश्च संरक्षणाय आवश्यकी वर्तते। उक्तमपि वर्तते यत् "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। संस्कृतभाषायां लेखनं न केवलं शब्दानां संयोजनम् अपितु विचाराणां, संस्कृतेः, भारतीयज्ञान-परम्परायाश्च संवर्धकम् अस्ति।भारतस्य स्वरूपं केवलं भौतिकविकासेनैव न निर्धार्यते अपितु तस्य स्वरूपम् आध्यात्मिकपरम्परया, वेदैः, उपनिषद्भिः, संस्कृतसाहित्येन, व्याकरणेन च निरूप्यते। "विना वेदं विना गीतां विना रामायणी कथाम्। विना कविः कालिदासं भारतं भारतं न हि।।" सन्दर्भेऽस्मिन् केन्द्रीय-संस्कृत-विश्वविद्यालयस्य पूर्व-कुलपतिः प्रोफेसर राधवल्लभ-त्रिपाठिमहोदयः युवसंस्कृतलेखकैः सह चर्चां कुर्वन्नब्रवीत् यत् आधुनिकयुगे कृत्रिम-बुद्धिचातुर्यस्य(A. I.) प्राकृतिक-बुद्धिचातुर्यस्य(N. I.)च मध्ये समन्वयः आवश्यकः अस्तीति। यतोहि कृत्रिम-बुद्धिचातुर्यं तत् यान्त्रिकज्ञानम् अस्ति यत् गणनां विश्लेषणं च शीघ्रत्वेन सम्पादयति तथा च प्राकृतिक-बुद्धिचातुर्यमिति मनुष्यस्य अन्तःस्थितः विवेकः, संस्कारः, नीतिशास्त्रञ्च अस्ति यत् भारतीयपरम्परायाः केन्द्रबिन्दुः अस्ति। यदि कृत्रिम-बुद्धिचातुर्यं बुद्धिं प्रददाति तर्हि प्राकृतिक-बुद्धिचातुर्यं सम्यक् मार्गं प्रदर्शयति। युव-लेखकाः एतयोः द्वयोः सन्तुलनं कृत्वा नवभारतस्य निर्माणे कर्तुं शक्नुवन्ति। पद्मश्रिया सभाजितः त्रिवेणीकविः प्रोफेसर अभिराज-राजेन्द्रमिश्रमहोदयः अवदत् यत् संस्कृतं साहित्यस्य गहनतां, वेदानां सार्वत्रिकं सन्देशं, आधुनिकविज्ञानस्य नवान्वेषणं च उपस्थापयितुं समर्थम् अस्ति इति। आधुनिकज्ञानं प्राचीनज्ञानस्य अपेक्षया भौतिकविकासे अधिकं केन्द्रीकृतम् अस्ति परन्तु प्राचीनभारतीयज्ञानं स्वविकासे, सामाजिक-सहयोगे, प्रकृति-सन्तुलने च आधारितम् आसीत्। कुलपतिः प्रो.रमाकान्तपाण्डेयवर्यः युवलेखकैः सह स्वविचारान् प्रकटयन् अवदत् यत् यदि युवाशक्तिः नवनवोन्मेषशालिनीप्रतिभया राष्ट्रे नैतिकतायाः, नूतनविचाराणां च प्रसारं करिष्यति तर्हि आगामिषु विंशतिषु वर्षेषु भारतं पूर्णतया विकसितराष्ट्रं भविष्यति विषयेऽस्मिन् कोऽपि संशयः नास्ति इति। अस्यां राष्ट्रीयसंगोष्ठ्यां डॉ.हरीशतिवारीवर्येण स्वागतभाषणम्, डॉ.प्रकाशपन्तवर्येण कार्यक्रमस्य सञ्चालनं विहितम्। अस्मिन्नवसरे डॉ.सुबोधश्रीवास्तवः, डॉ.प्रकाशमिश्रा, डॉ.सुनीलसमदानी, डॉ.निशि, डॉ.सुनीता इत्यादयः युवसंस्कृतलेखकाः उपस्थिताः आसन्।

## लौकिकन्यायकोशः" (४३०)

# " नरसिंहन्यायः"

नरसिंहावतारे नरस्य सिंहस्य च संयुक्तं रूपं दृश्यते।तथैव एकस्मिन् मनुष्ये मनुष्यत्वं, सिंहस्य इव क्रूरत्वादिकं च भवति चेत् नरसिंहन्यायस्य प्रयोगो भवति । अलङ्कारशास्त्रे संकरालङ्कारस्य विवेचनसमये अस्य न्यायस्य क्षीरन्यायस्य च प्रयोगः क्रियते।यथा-- "व्यक्ता च संसृष्टिर्नरसिंहवदिष्यते ।
चित्रवर्णवदन्यस्मिन् नानालङ्कारसङ्करे।
{सरस्वतीकण्ठाभरणे पृष्ठे २७२}

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी** - नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या** - नमस्ते नन्दिनि। अद्यतनी प्रथमा वार्ता गुरुग्रामतः अस्ति।
निवृत्तेः पश्चात् दम्पतीभ्यां साहसिकं जीवनम् आरब्धम्।
तत् जीवनम् अन्तर्जाले जनैः दृष्टम्, तेन बहवः जनाः प्रेरिताः।
**नन्दिनी** - अहो! वार्धक्ये अपि ताभ्यां महती प्रेरणा दत्ता।
द्वितीया वार्ता तु उद्योग-क्षेत्रात् अस्ति।
एकेन सह-संस्थापकेन एकः उत्तमः कर्मकरः रक्षितः।
तेन कर्मकरः एकम् एव प्रश्नं पृष्टः।
सः कर्मकरः धन-निमित्तं न गतवान् अस्ति इति तेन संस्थापकेन उक्तम्।
**काव्या** - सत्यम्, उत्तमः कर्मकरः संस्थायाः सम्पत्तिः एव।
इदानीं तृतीया वार्ता पर्व-विषये अस्ति।
कश्चित् पुरुषः एकां महिलाम् उच्च-पादुके धृत्वा सरलातया चलन्तीं दृष्टवान् अस्ति।
तत् दृष्ट्वा, तया पर्वं किमर्थम् उपयुक्तम् इति तेन पुरुषेण प्रश्नः पृष्टः।
तेन अन्तर्जाले महान् विवादः जनितः।
**नन्दिनी** - जनाः आवश्यक-सेवानाम् दुरुपयोगम् कुर्वन्ति इति खेद-जनकम्।
परं चतुर्थी वार्ता अतीव शोभना।
बिहार-राज्यस्य नालन्दा-मण्डले कालियाचक्र-ग्रामः पूर्णतया अपराध-मुक्तः जातः। तत्र जनैः शान्त्या एव जीवनं यापितम्।
**काव्या** - आम्, सः ग्रामः सर्वेभ्यः उत्तमम् उदाहरणं दत्तवान् अस्ति।
अद्यतनी वार्ता-समाप्तिः अत्रैव भवति। शुभ-दिनम्।

# वेदमन्त्रैः सह नवनिर्मितयज्ञशालायाः लोकार्पणम्

**हिमसंस्कृतवार्ताः प्रवेशकुमारशुक्लः।** श्रीगुरुवशिष्ठगुरुकुल विद्यापीठ वेदपाठशाला दर्शननगर परिसरे, अयोध्यायां नवनिर्मितयज्ञशालायाः वैदिकमन्त्रोच्चारणेन सह लोकार्पणम् अभवत्। अस्य यज्ञशालायाः निर्माणं प्रतापगढ़जिलायाः इसीपुर निवासी उमेशप्रतापसिंहः तस्य धर्मपत्नी सुनीतासिंहः च स्वमातुः स्मृतौ पञ्चदशलक्षरूप्यकैः कारितम् अस्ति। यज्ञशाला लालसुर्खपाषाणेन निर्मिता वर्तते अस्य नवनिर्मितभव्ययज्ञशालायाः श्रीगुरुवशिष्ठसेवान्याससंरक्षक श्रीरामवल्लभाकुंजस्य अधिकारी राजकुमारदासः, राष्ट्रिय स्वयंसेवकसंघ प्रचारक - पूर्वोत्तरप्रदेशक्षेत्र -सम्पर्क -प्रमुख मनोजजी च उपस्थितौ चतुर्वेद - पारायणमन्त्रेण सह लोकार्पणम् अभवत्। अस्मिन् अवसरेऽपि बृहत् संख्यायां उपस्थिताः अभिभावकाः, दानदाता उमेशप्रतापसिंहस्य पिता अमरपालसिंहः अन्यपरिवारजनाः, गुरुकुलप्रबन्धसमितेः डॉ. आरकेः सिंहः, आदर्शसिंह ऋषभः, डॉ. दिलीपसिंहः, भाजपानेता सर्वज्ञसिंहः, भानु तिवारी, आचार्य अक्षय वी देवघर, आचार्य आशुतोष जी, आचार्य अंकुरमिश्र, आचार्य शिवांकर पाठक, आचार्य आर्कजन चटर्जी, आचार्य बृजेश जी, आचार्य राजन जी च उपस्थिताः आसन् लोकार्पणात् पूर्वं नवरात्रौ नवदिनानि यावत् देवी भगवती पूजनम्, अनुष्ठानम्, दुर्गासप्तशती पाठः च सम्पन्नः। पूजने यजमानरूपेण यज्ञशालायाः निर्माणं करणवन्तौ उमेशप्रतापसिंहः, तस्य पत्नी सुनीतासिंहः च विशेषरूपेण उपस्थितौ। कार्यक्रमे धर्मनगरीयाः विशिष्टजनाः, सन्त-महन्तः, धर्माचार्याः आचार्यगणाः च उपस्थिताः। आचार्यैः वेदमन्त्रैः यज्ञशालायाः लोकार्पणम् करितम्।

